International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 229-232
© 2026 IJMH
www.themultijournal.com
Received: 04-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# रामस्तवकर्णरसायनम्: एकं समीक्षणम्

**कोलुसु गोविन्दराजुलु**

**सारांशः –** प्रकृते शोधलेखे महाकवि-रामभद्रदीक्षितस्य ऐतिहासिकपृष्ठभूमेः परिचयेन सह तस्य सुप्रसिद्धस्य भक्तिप्रधानकाव्यस्य 'रामस्तवकर्णरसायनस्य' कलात्मकं समीक्षणं विहितम्। रामभद्रदीक्षितः सप्तदशशतके तञ्जावूरस्य शाहजीमहाराजस्य आस्थानकविः आसीत्, यः नीलकण्ठमखिनः प्रशिष्यः तथा पञ्चदशग्रन्थानां कर्ता आसीत् । तस्य कृतिषु 'रामस्तवकर्णरसायनम्' इति स्तोत्रकाव्यं रामभक्तेः पराकाष्ठां द्योतयति । त्रयः निष्यन्दाः (भागाः) तथा ३८३ श्लोकाः अस्मिन् खण्डकाव्ये सन्ति । अस्य रचनायां लीलाशुकस्य 'कृष्णकर्णामृतस्य' स्पष्टः प्रभावः दृश्यते, यतः इदमपि पाठकानां कृते श्रुतिसुखदं रसामृतं वर्षति । काव्यस्य आन्तरिकसौन्दर्यं प्रकटयता लेखकेन प्रतिपादितं यत् सांसारिकमोहे निमग्नानां जनानां पापनिवारणाय श्रीरामसंस्मरणमेव एकमात्रः कल्याणप्रदः मार्गः अस्ति । स्तोत्रे कवेः कल्पनाशक्तिः अतीव रमणीया अस्ति, यत्र जनकसभायां शिवधनुर्भङ्गानन्तरं श्रीरामसीतयोः सात्त्विकं परस्परनिरीक्षणं, चित्रकूटे मन्दाकिन्याः तटे केसरतरोः छायायां सीतायाः शिरः स्वकीये अङ्के निधाय शयानस्य घनश्यामस्य श्रीरामस्य दिव्यं रूपं, तथा सरयूतटे तयोः दाम्पत्यप्रणयविलासः समासोक्त्यलङ्कारेण सजीवः कृतः। निष्कर्षतः एतत् काव्यं संस्कृतसाहित्ये भक्तिरसस्य काव्यकलायाश्च एकम् अनुपमं रत्नं वर्तते, यस्य प्रकृतलेखे सुचारु विवेचनं कृतम्।

**कूटशब्दाः –** अग्रहारः, आस्थानकविः, खण्डकाव्यम्, निष्यन्दः, मङ्गलपद्यम्, समासोक्तिः, सात्त्विकभावः, कवनपथः, समीक्षा ।

श्रीरामभद्रदीक्षितः तञ्जावूरस्य शाहजीमहाराजस्यायम् आस्थानकविरासीत् । शहाजिः कावेरीतीरे कुम्भघोणनगरस्य क्रोशद्वयमात्रपरिसरवर्तिनि तिरुविशनल्लूराख्यस्थले शहाजिराजपुरम् इति स्वनाम्ना अग्रहारमेकं निर्माय तत्रतत्र प्रदेशेभ्यः पण्डितान् समाहूय तेभ्यः सबहुमानं तत्र निवेश्य वृत्त्यर्थं तत्रैव पर्याप्तामुर्वरां भूमिं प्रायच्छत् । तत्र प्रतिगृहीतृषु मुख्यतमाः भवन्ति – (1) श्रीरामभद्रमखीन्द्रः (2) श्रीभास्करयज्वा (3) श्रीवेङ्कटकृष्णयज्वा (4) श्रीमहादेवकविः (5) तिप्पाध्वरी अन्ये च । एते सर्वेऽपि एकग्रामवासिनः आसन् । शाहजीपुरमिति स्थाने पण्डितानां कृते अनुमोदिते भूभागे एतेषां पण्डितानां विषये मराठीभाषाशासनमेकं प्राप्यते । तत्र रामभद्रदीक्षितस्य परिचयः एवं लिखितमस्ति यत् – **"रामभद्रदीक्षितः, नल्लादीक्षितस्य पौत्रः, एवं यज्ञरामदीक्षितस्य पुत्रः, तथा आश्वलायनसूत्रस्य कौण्डिन्यगोत्रीयः ऋग्वेदीयः ब्राह्मणः"** इति । तत्र श्लोकोऽयं यथा –

> **सतां तेनार्पितो राज्ञा शाहराजपुराभिधे ।**
> **अग्रहारे स्थितिसता रामभद्रेण यज्वना ॥**

विद्वद्राजः शहाजिः कलेः 4784 संवत्सरादारभ्य 4811 वत्सरावधिं (1684-1711 ख्रीष्टाब्दमध्ये) सप्तविंशतिवत्सरान् राज्यमकरोत् । अतएव रामभद्रदीक्षितस्य कालः सप्तदशशतकमिति विद्वद्भिः निर्णीयते ।

पुनश्च अयं नीलकण्ठविजयचम्पूकाव्यस्य कर्तुः नीलकण्ठमखिनः शिष्यः इति पूर्वमुक्तम् । श्रीनीलकण्ठचम्पूविजयकाव्ये तस्य रचनासमयः एवं लिखितः –

> **अष्टत्रिंशदुपस्कृतसप्तशताधिकचतुस्सहस्रेषु ।**
> **कल्यब्देषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम् [1]॥ इति ।**

अतः नीलकण्ठस्य शिष्यत्वेन तस्यापि कालखण्डः 4738 कल्यब्दः एवेति वक्तुं शक्यते।

**रामभद्रदीक्षितस्य कृतयः**

कवेः रामभद्रदीक्षितस्य नाम्ना नैकाः कृतयः प्राप्यन्ते। यथा –

1. जानकीपरिणयम् (नाटकम्)
2. शृङ्गारतिलकभाणः (अय्यभाणः)
3. परिभाषावृत्तिव्याख्यानम्
4. षड्दर्शनसिद्धान्तसंग्रहः
5. पतञ्जलिचरितवाक्यम्
6. बाणस्तवम्
7. चापस्तवम्
8. तूणीरस्तवम्
9. प्रसादस्तवम्
10. विश्वगर्भस्तवम्
11. रामस्तवकर्णरसायनम्
12. अष्टप्रासः
13. आश्चर्यस्तवराजभूषणम्
14. पर्यायोक्तिस्निह्यानन्दः
15. रामभद्रशतकम् इत्यादयः।

एतेषु कानिचन स्तोत्राणि रामभद्रसाहस्रमञ्जरी इत्याख्ये ग्रन्थे प्रथमभागे प्रकाशितानि सन्ति। यथा –

1) रामस्तवकर्णरसायनम्
2) वर्णमालास्तोत्रम्
3) रामप्रसादस्तवः
4) रामाष्टप्रासस्तवः
5) विश्वगर्भस्तवः
6) रामचरित्रस्तवः
7) रामचापस्तवः
8) श्रीरामबाणस्तवः
9) श्रीरामाष्टोत्तरशतनामावलिः इति।

**(1) रामस्तवकर्णरसायनम्** - रामस्य स्तुतयः कर्णयोः कृते रसायनसदृशाः भवन्ति। रसायनं नाम अमृतम्। श्रीरामः मानवरूपेण देवतातुल्यः भारतीयैः पूज्यते। श्रीमता वाल्मीकिमहर्षिणा अस्य चरित्रमाधारीकृत्य यद्रामायणं रचितं तत्सर्वेषामपि आदर्शरूपं भवति। अयं धर्मवीररूपेण सर्वेषां देशवासिनां दुःखजनकासुरं नाशयित्वा प्रसिद्धिं प्राप। अस्यैव चरित्रमाधारीकृत्य स्तुतिमूलकं **रामस्तवकर्णरसायनम्** इति काव्यं कविना रामभद्रेण प्रणीतम्। अस्मिन् स्तोत्रे भागत्रयं निष्यन्दनाम्ना विद्यते। तत्र प्रथमनिष्यन्दे १६७ श्लोकाः, द्वितीये १०५ श्लोकाः, तृतीये च १११ श्लोकाः सन्ति। एवमाहत्य त्रिषु निष्यन्देषु ३८३ श्लोकाः वर्तन्ते।

महाकविः रामभद्रदीक्षितमहोदयः श्रीरामचन्द्रस्य परमभक्त आसीत्। अतः श्रीरामचन्द्रस्य गुणवैभवान् स्वीकृत्य तेन काव्यमिदं रामस्तवकर्णरसायनम् इति खण्डकाव्यं व्यरचि। अस्य काव्यस्य रचनायां लीलासुकस्य कवेः कृष्णकर्णामृतमिति नामकस्य काव्यस्य महान् प्रभावः अवलोक्यते। लीलासुकेन रचितं कृष्णकर्णामृतं यथा कृष्णभक्तानां पाठकानाञ्च मनसि अपूर्वम् आह्लादं जनयति, अपि च तत्काव्यश्रवणेन भक्ताः कर्णमाध्यमेन रसामृतमास्वादयन्ति, तथैव श्रीरामचन्द्रस्य चरित्रसंवलितं काव्यमिदं सर्वेषां पाठकानां श्रुतिसुखदं रसामृतं निस्पादयति इति नास्ति सन्देहस्य लेशोऽप्यवकाशः। कविः लिखति –

**रघुवरचरणारविन्दभक्तिच्छलमकरन्दनिरन्तराभिषिक्ताः।**
**वकुलपरिमला गिरो मदीयाः कविकुलकर्णरसायनानि सन्तु॥**[2]

कर्णामृतं कर्णरसायनम् इति पदद्वयं समानार्थकं भवति। कविः अत्र श्रीरामचन्द्रस्य व्यक्तिगतवैभवं दर्शयन् श्रीरामनामसङ्कीर्तनं प्रति पाठकान् आकर्षयति। मङ्गलपद्ये कविनोच्यते –

**दिशतु स कुशलं जिते दशास्ये**
**विधिविहितस्तुतिवेदितस्वरूपः।**
**उपदिशति शिवो नृणां यदीयं**
**मनुमविमुक्तिपुरे विमुक्तिहेतोः॥**[3]

ये जनाः विधिनिर्दिष्टं कर्तव्यं विस्मृत्य निषिद्धानि कर्माणि आचरन्ति, अकृताक्षनिग्रहाः भवन्ति अर्थात् इन्द्रियस्य वशीभूताः तद्दमने असमर्थाः भवन्ति, जीवने दुष्कर्माणि कृत्वा पापमुपार्जयन्ति, तेषां विमुक्त्यर्थं रामनामसंस्मरणमेव श्रेयः प्रेयश्च मार्गः इति कविः काव्येऽस्मिन् स्वाधमर्ण्यप्रघटनपूर्वकमुपस्थापयति। यथा –

**विहितविधिमपास्यता निषिद्धा-**
**न्यपि चरताऽप्यकृताक्षनिग्रहेण।**
**यदघमुपचितं मया यतिष्ये**
**रघुवरसंस्मरेण तन्निमार्ष्टुम्॥**[4]

दीक्षितवर्योऽयमाबाल्यात्कविः आसीत्। नैकैः विषयैः तस्य मनः प्रेरितमाकर्षितं सत् बहूनि काव्यानि अरचयत्। अनेकानि समसामयिकघटनाश्रितानि काव्यानि तेन प्रणीतानि। किन्तु दिशि दिशि वासनया तस्य मनः विकृष्टं जातम्। अतः कवनपथे रमणीयरामनामसङ्कीर्तनम् अवतार्य सर्वेषां पाठकानां कृते तेन उपायनरूपेण काव्यमिदं प्रदत्तमस्ति। उक्तं च तेन,

**चिरपरिचितया मनो विकृष्टं**
**दिशि दिशि वासनया न मे नियाम्यम्।**
**इति कवनपथेऽवतार्य राम-**
**स्मरणविधावनघे करोम्युपायनम्॥**[5]

प्रथमनिष्यन्दे कविः मुनिगणैः स्तुतायाः वैदेह्याः सुलभसुन्दर-स्वभावान् अपि प्रकाशयति। एषा विदेहकन्या प्रकृतिरिति, सरस्वतीति, लक्ष्मीरिति, गिरिजेति, जगन्मयीति मुनिभिः स्तूयते। कविः स्वकाव्यसिद्ध्यै कथमपि तां कलयति।[6] सीतादेवी

सर्वासामपि पतिव्रतानां मुकुटायमानेति प्रतिपाद्यते । एषा भूमेरुत्पन्ना महीकुमारीति सम्बोध्यते ।[7]

प्रत्येकं मानव: अधुना हृदयविषयमेव सेवसे । मनोऽनुकूलव्यापारमेव आचरति । वस्तुत: मनसा सञ्चालित: मानव: सर्वदा दु:खमेवानुभवति । एतादृश: व्यापार: भयङ्करविषसम: क्रमेण मानवं मदयति अन्ततोगत्वा विनाशयति च । अत: अस्मिन् सन्दर्भे रामभजनमेव करणीयमिति कवि: निगदति । यथा -

**हृदयविषयमेव सेवसे किं**
**यदयमुदग्रविषोपम: क्रमेण ।**
**मदयति च निहन्ति च प्रकामं**
**तदयनमेत्य गिरां भजस्व रामम् ।।[8] १/६**

अत्र रामचन्द्रस्य यद्वैभवं वर्णितं कविना तत्किञ्चित्परिशील्यते । रामचन्द्र: अयोध्यानरेशस्य दशरथस्य ज्येष्ठपुत्र आसीत् । पितृसत्यपालनार्थं स: चतुर्दशवर्षाणि यावद्वनवासं चकार । तस्मिन् समये तस्य कनिष्ठभ्रता भरत: तत्पादुकां सिंहासने संस्थाप्य तदादर्शनानुप्राणित: राज्यं शशास । सीता रामस्य धर्मपत्नी आसीत् । सा प्रत्येकमपि समये श्रीरामस्य पार्श्वे एव बभूव । वनवासार्थं साऽपि गतवती । शरीरेण मरकतमणिनिभस्य श्रीरामचन्द्रस्य हस्ते सर्वदा कार्मुकमेवाशोभत । एतादृशादर्शभूत: श्रीरामचन्द्र: सर्वेषामपि आश्रय एव । तदर्थं कविनोच्यते -

**भरतविदितपादुकाप्रभावं**
**धरतनयादरणीयनामधेयम् ।**
**करतलधृतकार्मुकं पुमांसं**
**मरकतनीलशरीरमाश्रयाम: ।।[9]**

अयं श्रीराम: सर्वेषां नेत्रनिर्वृतिप्रद:, कुटिला: ये निशाचरा: गजा: तेषां कृते मृगेन्द्र: सिंह: यथा भवति दुष्टानां कृते तत्स्वभाववान् बभूव। अस्य कटौ सर्वदा खड्गं शोभते हस्तयो: चापबाणशोभितं मेघवर्णम् एतादृशं रामचन्द्रं सम्बोध्य कवि: स्तुतिमत्र प्रस्तौति । यथा -

**निटिलनयननिर्वृतिप्रदाख्यं**
**कुटिलनिशाचरकुम्भिनां मृगेन्द्रम् ।**
**कटिलसदसिमम्बुदाभमेकं**
**जटिलमुरीकृतचापबाणमीडे ।।[10]**

कवि: एकत्र शिवधनुष: भङ्गप्रसङ्गे श्रीराम-सीतयो: परस्परालोकनम् अतीव रमणीयतया वर्णयति । जनकस्य राजसभायां श्रीरामचन्द्र: शिवधनुष: उपरि गुणारोपणं कृत्वा तत् एकस्मिन् क्षणे एव भग्नं चकार । अनेन धनुर्भङ्गशब्देन सर्वेऽपि लोकत्रयस्य जना: विमोहिता: जाता: । माता जानकी श्रीरामं पतिरूपेण वरयामास । सभायां परस्परम् असकृत् अपश्यताम् । एवमुन्मिषत्पुलकयो: तयो: रघुवर-क्षमाकन्ययो: अपेतत्रपं परस्परनिरीक्षणं सर्वोत्कर्षेण वर्तते इति कवि: जयतीति पदेन उपस्थापयति । यथा -

**विमोहयति विष्टपत्रयजनान् गुणारोपण-**
**क्षणत्रुटितचण्डिकारमणचापचण्डध्वनौ ।**
**जयत्यसकृदुन्मिषत्पुलकयोरपेतत्रपं**
**परस्परनिरीक्षणं रघुवरक्षमाकन्ययो: ।।[11]**

अस्मिन् जगति श्रीरामचन्द्रसदृश: कोऽपि वीर: विरल एव भवति, य: समुद्रे सेतुबन्धनं चकार । तस्मात् तस्य तूणीशय: वडवाग्निबन्धु: इति कविना उपस्थाप्यते । तस्योपरि विजयं प्राप्तुं न कोऽपि समर्थ आसीत् । किन्तु जानकीनयनपद्मं कामदेवस्य बाणतुल्यं तदुपरि एकाकि विजयं प्राप्तुं समर्थो बभूवेति कवि: निवेदयति । यथा -

**करोमि हृदयाम्बुजे कमपि वीरमम्भोनिधे-**
**र्निबन्धनमबिन्धनज्वलनबन्धुतूणीशयम् ।**
**न कश्चिदपि दृश्यते जगति यस्य शक्तो जये**
**स्मरं प्रहितजानकीनयनपद्मबाणं विना ।।[12]**

अयं दलदुत्पलद्युति:, उदारवेषोज्ज्वल:, शरधनुर्धर:, विकटचित्रकूटाटवीचर:, शङ्करप्रणयिनी- प्रिय: इति सम्बोध्यते कविना । चित्रकूटाटव्यां श्रीरामसीतयो: परस्परालिङ्गनेन श्रीरामचन्द्रस्य वक्षस्तट्या सीताया: कुङ्कुमलेपस्य परिकल्पनां कृत्वा कवि: लिखति-

**भजे शरधनुर्धरं विकटचित्रकूटाटवी-**
**चरं कमपि शङ्करप्रणयिनीप्रियाख्यं प्रभुम् ।**
**स्फुटं कलितकुङ्कुमा वदति यस्य वक्षस्तटी**
**मृगेन्द्ररसितत्रसज्जनकजाहठालिङ्गनम् ।।[13]**

एकत्र काव्येऽस्मिन् सरय्वा: नद्या: अनुपमं वर्णनं करोति । यथा -

**कल्हाराम्बुजगन्धिमन्दपवने खेलन्मृगालङ्कृते**
**कूजत्कोकिलबालचूतगहने कूले सरय्वा: शुभे ।**
**पश्यान्वेति शुकं शुकीति चिबुके गृह्णन्करेण प्रियां**
**चित्ते भाति स कोऽपि मे दशशिरोमत्तेभकण्ठीरव: ।।[14]**

अत्र पश्यान्वेति शुकं शुकीति चिबुके गृह्णन्करेण प्रियाम् इति समासोक्त्या श्रीराम-श्रीजानक्यो: प्रणय: प्रस्तावित: कविना । पुनरपि कविनाऽत्र चित्रकूटस्य वर्णना अतीवरमणीयतया क्रियते, अपि च तत्र कुशास्तरणे घनश्याम: श्रीरामचन्द्र: विदेहदुहितु: सीताया: शिर: स्वीयाङ्के संस्थाप्य कथं राजते तदपि उल्लिख्यते । यथा -

**माद्यत्केकिनी चित्रकूटकटके मन्दाकिनीमेदुरे**
**प्रत्यग्रप्रसवस्य केशरतरो: प्रच्छायशीते तले ।**
**कौशेयास्तरणे विदेहदुहित: कुर्वाणमङ्के शिरो**
**नीलाम्भोदनिभं भजे रघुकुलप्राचीनभाग्यं प्रभुम् ।।[15]**

एवमन्यानि बहूनि उदाहरणानि अत्र पर्यायोक्तनिष्यन्दे सन्ति । विस्तरात् सर्वेऽत्र नोपस्थाप्यन्ते । अलङ्कारविचारसन्दर्भे तेषां पुनरालोचना करिष्यते ।

**निष्कर्षतः** महाकवि-रामभद्रदीक्षितप्रणीतं 'रामस्तवकर्णरसायनम्' इति स्तोत्रकाव्यं संस्कृत- साहित्ये भक्तिरसस्य कलात्मकसौन्दर्यस्य च अनुपमं निदर्शनं वर्तते । कवेः अनन्यरामभक्तिः, शब्दसौष्ठवम्,

अलङ्कारयोजना (विशेषतः समासोक्तिः), मनोहारि चित्रणं च ग्रन्थममुं श्रुतिसुखदं रसामृतं विदधति। ऐतिहासिकदृष्ट्या अयं लेखः तञ्जावूरस्य शाहजीमहाराजस्य कालखण्डं साहित्यिकपृष्ठभूमिं च सुचारु प्रकाशयति। कवेः कल्पनाशक्तिः सरयूतटे चित्रकूटप्रसङ्गे च पराकाष्ठां प्राप्नोति। सांसारिककष्टेभ्यः विमुक्तये रामनामसंस्मरणमेव एकमात्रं कल्याणप्रदं साधनमिति ग्रन्थस्यास्य मुख्यः सन्देशः। अतः भक्ति-काव्य-शास्त्रत्रिवेणीरूपोऽयं ग्रन्थः सहृदयानां पाठकानां चेतांसि आह्लादयितुं सर्वथा समर्थः वर्तते।

**सहायकग्रन्थसूची**


1) **रामभद्रसाहस्रमञ्जरी, तमिलानुवादसिहतः, अनुवादकः – वी.स्वामिनाथ अत्रेयः। प्रकाशकः–** श्री महापेरियावल ट्रष्ट, गुरुकृपा – 94, आई.टी.आई. ले अउट्, बाङ्गालुरु- 560 054।
2) **तञ्जावूर-मराठा-राज्ञाम् इतिहासः (मराठी-भाषा-शासनानि)। सम्पादकः/लेखकः:** टी. एस. कुप्पुस्वामी शास्त्री / सेरफ़ोजी सरस्वती महाल पुस्तकालय (TMSSML), तञ्जावूर।
3) **नीलकण्ठविजयचम्पूः। लेखकः:** महाकवि-नीलकण्ठदीक्षितः (मखी)। **व्याख्याकारः:** पण्डित-महादेवसूरिः। **प्रकाशनम्:** निर्णयसागर प्रेस्, मुम्बई (काव्यमाला सिरीस्)।


**पाद टिप्पणी -**

1. नी.क.वि. -
2. रा.स्त.क.र. – 1/7
3. रा.स्त.क.र. – 1/1
4. तत्रैव – 1/2
5. रा.स्त.क.र. – 1/3
6. प्रकृतिरिति सरस्वतीति लक्ष्मीरिति गिरिजेति जगन्मयीति वा याम्।
   गदति मुनिगणः कवित्वसिद्धै कथमपि तां कलये बिदेहकन्याम्।। (१/४)
7. तत्रैव – १/5
8. रा.स्त.क.र. – १/६
9. रा.स्त.क.र. – १/९
10. रा.स्त.क.र. – १/९
11. रा.स्त.क.र. – १/११
12. रा.स्त.क.र. – १/१२
13. तत्रैव – १/१४
14. तत्रैव – १/१८
15. रा.स्त.क.र. - १/१९